# Gangastotram 3

# ગઙ્ગાસ્તોત્રમ્ ૩

## Document Information

Text title : Gangastotram 3

File name : gangAstotram3.itx

Category : devii, devI, nadI

Location : doc_devii

Transliterated by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Proofread by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Description/comments : Ganga Jnana Mahodadhi compiled by Acharya Ramapada Chakravarty

Latest update : December 7, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 7, 2019

*sanskritdocuments.org*

# Gangastotram 3

# ગઙ્ગાસ્તોત્રમ્ ૩

શ્રીગણેશાય નમઃ ।
અથાનન્તરતો દેવિ સમયાસ્તોત્રમુત્તમમ્ ।
યેન સ્તુતા સિદ્ધમૂલી ભક્ષિતા ફલદા ભવેત્ ॥ ૧॥
સંવિદે બ્રહ્મસમ્ભૂતે બ્રહ્મપુત્રિ સદાનઘે ।
ભૈરવાનન્દદીપ્ત્યર્થં પવિત્રા ભવ સર્વદા ॥ ૨॥

નમામિ યામિનીનાથલેખાલઙ્કૃતમસ્તકામ્ ।
ભવાની ભવસન્તાપનિર્વાપણ-સુધાનિધિમ્ ॥ ૩॥

સિદ્ધિમૂલીં શ્રયે દેવી હીનબોધપ્રબોધિનીમ્ ।
રાજપ્રજાવશકરી કાલકણ્ઠે ત્રિશૂલિનિ ॥ ૪॥

અજ્ઞાનેન્ધનદીપ્તાગ્રે જ્ઞાનવિજ્ઞાનરૂપિણિ ।
આનન્દાદ્યાહુતિપ્રીતે સમ્યગ્જ્ઞાનં પ્રયચ્છ મે ॥ ૫॥

દણ્ડાધિરૂઢપરિપૂરિતભોગમોક્ષાં
    મુણ્ડાક્રમેણ મદનાં જનકામિનીનામ્ ।
આરાધયામિ બહુશત્રુપરાજયન્તી
    વિશ્વેશ્વરી ત્રિભુવનાં વિજયેતિ દેવીમ્ ॥ ૬॥

આનન્દનન્દિનીનન્દે સદાવન્દ્યપદદ્વયે ।
ઉલ્લાસકદલીકન્દે સ્વચ્છન્દે બોધરૂપિણિ ॥ ૭॥

કવયઃ કવિતાલહરી કુરુતે તત્ત્વાર્થદર્શનં પુંસામ્ ।
અપહરતિ દુરિતનિલયં કિં કિં ન કરોતિ સંવિદુલ્લાસઃ ॥ ૮॥

સંવિદાસવયોર્મધ્યે સંવિદેવ ગરીયસી ।
સંવિદાશ્રયણાદેવ તદાત્મા પુરુષઃ સ્મૃતઃ ॥ ૯॥

શ્યામૈવ રામા કવિરેવ વિદ્વાન્ વિદ્યૈવ બન્ધુર્ધનુરેવ શસ્ત્રમ્ ।
ગઙ્ગૈવ તીર્થં સ્મર એવ ધન્વી માર્ગેષુ માહેશ્વર એવ માર્ગઃ ॥ ૧૦॥

કથઞ્ચિદેષા કરુણાકટાક્ષૈર્નિરીક્ષતે માં પરદેવતા ચેત્ ।
વૃથા કથાકલ્પમહીરુહાણામલં ચ ચિન્તામણિચિન્તનેન ॥ ૧૧॥

અલિપિશિતપુરન્ધ્રીભોગપુઞ્જારતોઽહં
    બહુવિધકુલમાર્ગારમ્ભસમ્ભાવિતોઽહમ્ ।
પશુજનવિમુખોઽહં ભૈરવીં સંશ્રિતોઽહં
    ગુરુચરણરતોઽહં ભૈરવોઽહં શિવોઽહમ્ ॥ ૧૨॥

વામોરુસ્તે રમણકુશલા દક્ષિણે ચાલિપાત્રં
    તમ્રા મુદ્રાશ્ચણકવટકાઃ સૌકરં સુષ્ઠુ માંસમ્ ।
તન્ત્રી વીણા સરસકવયઃ સત્કથા સદ્ગુરૂણાં
    કૌલો ધર્મઃ પરમગહનો યોગિનામપ્યગમ્યઃ ॥ ૧૩॥

કૌલરહસ્યે ગલાર્ણવે । શ્રીરસ્તુ ।

ઇતિ સમયાચારતન્ત્રે ગઙ્ગાસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Anil Kumar Pandey anil.kumar17pandey at gmail.com

---

*Gangastotram 3*

pdf was typeset on December 7, 2019

Please send corrections to *sanskrit@cheerful.com*